॥ શ્રી ॥

અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ

## ॥ શ્રી મધ્વવિજયઃ ॥

### ૧. પ્રથમઃ સર્ગઃ

કાંતાય કલ્યાણગુણૈકધામ્ને નવદ્યુનાથપ્રતિમપ્રભાય ।
નારાયણાયાખિલકારણાય શ્રીપ્રાણનાથાય નમસ્કરોમિ ॥ ૧.૧ ॥
અનાકુલં ગોકુલમુલ્લલાસ યત્પાલિતં નિત્યમનાવિલાત્મ ।
તસ્મૈ નમો નીરદનીલભાસે કૃષ્ણાય કૃષ્ણારમણપ્રિયાય ॥ ૧.૨ ॥
અપિ ત્રિલોક્યા બહિરુલ્લસંતી તમો હરંતી મુહુરાંતરં ચ ।
દિશ્યાદ દૃશં નો વિશદાં જયંતી મધ્વસ્ય કીર્તિર્દિનનાથદીપ્તિમ ॥ ૧.૩ ॥
તમોનુદાઽઽનંદમવાપ લોકઃ તત્વપ્રદીપાકૃતિગોગણેન ।
યદાસ્યશીતાંશુભુવા ગુરૂંસ્તાન ત્રિવિક્રમાર્યાન પ્રણમામિ વર્યાન ॥ ૧.૪ ॥
મુકુંદભક્ત્યૈ ગુરુભક્તિજાયૈ સતાં પ્રસત્ત્યૈ ચ નિરંતરાયૈ ।
ગરીયસીં વિશ્વગુરોર્વિશુદ્ધાં વક્ષ્યામિ વાયોરવતારલીલામ ॥ ૧.૫ ॥
તાં મંત્રવર્ણૈરનુવર્ણનીયાં શર્વેંદ્રપૂર્વૈરપિ વકતુકામે ।
સંક્ષિપ્નુવાક્યે મયિ મંદબુદ્ધૌ સંતો ગુણાઢ્યાઃ કરુણાં ક્રિયાસુઃ ॥ ૧.૬ ॥
ઉચ્ચાવચા યેન સમસ્તચેષ્ટાઃ કિં તત્ર ચિત્રં ચરિતં નિવેદ્યં ।
કિંતૂત્તમશ્લોકશિખામણીનાં મનોવિશુદ્ધ્યૈ ચરિતાનુવાદઃ ॥ ૧.૭ ॥
માલાકૃતસ્તચ્ચરિતાખ્યરત્નૈઃ અસૂક્ષ્મદૃષ્ટેઃ સકુતૂહલસ્ય ।
પૂર્વાપરીકારમથાપરં વા ક્ષામ્યંતુ મે હંત મુહુર્મહાંતઃ ॥ ૧.૮ ॥
શ્રીવલ્લભાજ્ઞાં સસુરેંદ્રયાજ્ઞાં સંભાવ્ય સંભાવ્યતમાં ત્રિલોક્યામ ।
પ્રાણેશ્વરઃ પ્રાણિગણપ્રણેતા ગુરુઃ સતાં કેસરિણો ગૃહેઽભૂત ॥ ૧.૯ ॥
યેયે ગુણા નામ જગત્પ્રસિદ્ધાઃ યં તેષુ તેષુ સ્મ નિદર્શયંતિ ।

સાક્ષાન્મહાભાગવતપ્રબર્હં શ્રીમંતમેનં હનુમંતમાહુઃ ॥ ૧.૧૦ ॥
કર્માણિ કુર્વન પરમાદ્ભુતાનિ સભાસુ દૈવીષુ સભાજિતાનિ ।
સુગ્રીવમિત્રં સ જગત્પવિત્રં રમાપતિં રામતનું દદર્શ ॥ ૧.૧૧ ॥
પાદારવિંદપ્રણતો હરીંદ્રઃ તદા મહાભક્તિભરાભિનુન્નઃ ।
અગ્રાહિ પદ્મોદરસુંદરાભ્યાં દોર્ભ્યાં પુરાણેન સ પૂરુષેણ ॥ ૧.૧૨ ॥
અદાર્યસાલાવલિદારણેન વ્યાપાદિતેંદ્રપ્રભવેન તેન ।
પ્રાદ્યોતનિપ્રીતિકૃતા નિકામં મધુદ્વિષા સંદિદિશે સ વીરઃ ॥ ૧.૧૩ ॥
કર્ણાંતમાનીય ગુણગ્રહીત્રા રામેણ મુક્તો રણકોવિદેન ।
સ્ફુરન્નસૌ વૈરિભયંકરોઽભૂત સત્પક્ષપાતી પ્રદરો યથાઽગ્ર્યઃ ॥ ૧.૧૪ ॥
ગોભિઃ સમાનંદિતરૂપસીતઃ સ્વવહ્નિનિર્દગ્ધપલાશિરાશિઃ ।
અહો હનૂમન્નવવારિદોઽસૌ તીર્ણાંબુધિર્વિષ્ણુપદે નનામ ॥ ૧.૧૫ ॥
અપક્ષપાતી પુરુષસ્ત્રિલોક્યાં અભોગભોક્તા પતગાધિરાજમ ।
વિશ્વંભરં બિભ્રદસૌ જિગાય ત્વરાપરાક્રાંતિષુ ચિત્રમેતત ॥ ૧.૧૬ ॥
નિબદ્ધ્ય સેતું રઘુવંશકેતુભ્રૂભંગસંભ્રાંતપયોધિમધ્યે ।
મુષ્ટિપ્રહારં દશકાય સીતાસંતર્જનાગ્ર્યોત્તરમેષકોઽદાત ॥ ૧.૧૭ ॥
જાજ્વલ્યમાનોજ્જ્વલરાઘવાગ્નૌ યક્રે સ સુગ્રીવસુયાયજૂકે ।
આધ્વર્યવં યુદ્ધમખે પ્રતિપ્રસ્થાત્રા સુમિત્રાતનયેન સાકમ ॥ ૧.૧૮ ॥
રામાર્ચને યો નયતઃ પ્રસૂનં દ્વાભ્યાં કરાભ્યામભવત પ્રયત્નઃ ।
એકેન દોષ્ણા નયતો ગિરીંદ્રં સંજીવનાદ્યાશ્રયમસ્ય નાભૂત ॥ ૧.૧૯ ॥
સ દારિતારિં પરમં પુમાંસં સમન્વયાસીન્નરદેવપુત્ર્યા ।
વહ્નિપ્રવેશાધિગતાત્મશુદ્ધ્યા વિરાજિતં કાંચનમાલયેવ ॥ ૧.૨૦ ॥
શ્યામં સ્મિતાસ્યં પૃથુદીર્ઘહસ્તં સરોજનેત્રં ગજરાજયાત્રમ ।
વપુર્જગન્મંગલમેષ દૃગ્ભ્યાં ચિરાદયોધ્યાધિપતેઃ સિષેવે ॥ ૧.૨૧ ॥

રાજ્યાભિષેકેડવસિતેડત્ર સીતા પ્રેષ્ઠાય નસ્તાં ભજતાં દિશેતિ ।
રામસ્ય વાણ્યા મણિ મંજુમાલાવ્યાજેન દીર્ઘાં કરુણાં બબંધ ॥ ૧.૨૨ ॥
હૃદોરુસૌહાર્દભૃતાડધિમૌલિ ન્યસ્તેન હસ્તેન દયાર્દ્ર દૃષ્ટ્યા ।
સેવાપ્રસન્નોડમૃતકલ્પવાચા દિદેશ રામઃ સહભોગમસ્મૈ ॥ ૧.૨૩ ॥
પ્રેષ્ઠો ન રામસ્ય બભૂવ તસ્માત ન રામરાજ્યેડસુલભં ચ કિંચિત ।
તત્પાદસેવારતિરેષ નૈચ્છત તથાડપિ ભોગાન નનુ સા વિરક્તિઃ ॥ ૧.૨૪ ॥
નમો નમો નાથ નમોનમસ્તે નમો નમો રામ નમો નમસ્તે ।
પુનઃપુનસ્તે ચરણારવિંદં નમામિ નાથેતિ નમન સ રેમે ॥ ૧.૨૫ ॥
કિં વર્ણયામઃ પરમં પ્રસાદં સીતાપતેસ્તત્ર હરિપ્રબર્હે ।
મુંચન મહીં નિત્યનિષેવણાર્થં સ્વાત્માનમેવૈષ દદૌ યદસ્મૈ ॥ ૧.૨૬ ॥
સ્વાનંદહેતૌ ભજતાં જનાનાં મગ્નઃ સદા રામકથાસુધાયામ ।
અસાવિદાનીં ચ નિષેવમણો રામં પતિં કિંપુરુષે કિલાડસ્તે ॥ ૧.૨૭ ॥
તસ્યૈવ વાયોરવતારમેનં સંતો દ્વિતીયં પ્રવદંતિ ભીમમ ।
સ્પૃષ્ટૈવ યં પ્રીતિમતાડનિલેન નરેંદ્રકાંતા સુષુવેડત્ર કુંતી ॥ ૧.૨૮ ॥
ઈંદ્રાયુધં હીંદ્રકરાભિનુન્નં ચિચ્છેદ પક્ષાન ક્ષિતિધારિણાં પ્રાક ।
બિભેદ ભૂભૃદ્રપુરંગસંગાત ચિત્રં સ પન્નો જનનીકરાગ્રાત ॥ ૧.૨૯ ॥
પુરે કુમારાનલસાન વિહારાત નિરીક્ષ્ય સર્વાનપિ મંદલીલઃ ।
કૈશોરલીલાં હતસિંહસંઘાં વૃત્તાં વને પ્રાક સ્મરતિ સ્મ સૂત્કઃ ॥ ૧.૩૦ ॥
ભુકતં ચ જીર્ણં પરિપંથિદત્તં વિષં વિષણ્ણો વિષભૃદ્રણોડતઃ ।
પ્રમાણકોટેઃ સ હિ હેળયાડગાત નેદં જગજ્જીવનદેડત્ર ચિત્રમ ॥ ૧.૩૧ ॥
દગ્ધ્વા પુરં યોગબલાત સ નિર્યન ધર્માનિવ સ્વાન સહજાન દધાનઃ ।
અદારિભાવેન જગત્સુ પૂજ્યો યોગીવ નારાયણમાસસાદ ॥ ૧.૩૨ ॥
સમર્પ્ય કૃત્યાનિ કૃતી કૃતાનિ વ્યાસાય ભૂમ્ને સુકૃતાનિ યાવત ।

કરિષ્યમાણાનિ ચ તસ્ય પૂજાં સંકલ્પયામાસ સ શુદ્ધબુદ્ધિઃ ॥ ૧.૩૩ ॥
વિષ્ણોઃપદશ્રિદ બકસન્નિરાસી ક્ષિપ્તાન્યપક્ષિપ્રકરઃ સુપક્ષઃ ।
સસોદરોઽથાઽદિત રાજહંસઃ સ રાજહંસીમિવ રાજકન્યામ ॥ ૧.૩૪ ॥
ઈંદીવરશ્રીજયિસુંદરાભં સ્મેરાનનેંદું દયિતં મુકુંદમ ।
સ્વમાતુલેયં કમલાયતાક્ષં સમભ્યનંદત સુચિરાય ભીમઃ ॥ ૧.૩૫ ॥
મહાગદં ચંડરણં પૃથિવ્યાં બાર્હદ્રથં મંક્ષુ નિરસ્ય વીરઃ ।
રાજાનમત્યુજ્જ્વલરાજસૂયં ચકાર ગોવિંદસુરેંદ્રજાભ્યામ ॥ ૧.૩૬ ॥
દુઃશાસનેનાઽકુલિતાન પ્રિયાયાઃ સૂક્ષ્માનરાળાનસિતાંશ્ચ કેશાન ।
જિઘાંસયા વૈરિજનસ્ય તીક્ષ્ણઃ સ કૃષ્ણસર્પાનિવ સંચિકાય ॥ ૧.૩૭ ॥
જાજ્વલ્યમાનસ્ય વને વનેઽલં દિધક્ષતઃ પાર્થિવસાર્થમુગ્રમ ।
સત્ત્વાનિ પુંસાં ભયદાનિ નાશં વૃકોદરાગ્નેર્ગુરુતેજસાઽઽપુઃ ॥ ૧.૩૮ ॥
ભોગાધિકાભોગવતોઽરુણાક્ષાન ઈતસ્તતઃ સંવલતો ધરેંદ્રે ।
બહૂન દ્વિજિહ્વાન મણિમત્પુરોગાન અસૌ કટૂન ક્રોધવશાન જઘાન ॥
૧.૩૯ ॥
અથૈષ વેષાંતરભસ્મલીનઃ ક્રમેણ વાયુપ્રભવઃ સુતેજાઃ ।
રુદ્ધાખિલાશં મુખરં પ્રચંડં ભસ્મીચકારાખિલકીચકૌઘમ ॥ ૧.૪૦ ॥
સ કૃષ્ણવર્ત્મા વિજયેન યુક્તો મુહુર્મહાહેતિધરોઽપ્રધૃષ્યઃ ।
ભીષ્મદ્વિજાદ્યૈરતિભીષણાભં વિપક્ષકક્ષં ક્ષપયન વિરેજે ॥ ૧.૪૧ ॥
તરસ્વિનઃ પ્રોચ્ચલિતાનધીરાન નિર્દગ્ધપક્ષાનતિતીક્ષ્ણકોપાન ।
સ ધાર્તરાષ્ટ્રાન બહુહેતિલીલો વિનાશ્ય વિશ્વાન પરયા શ્રિયાઽભાત ॥
૧.૪૨ ॥
કૃષ્ણાંઘ્રિપંકેરુહભૃંગરાજઃ કૃષ્ણામુખાંભોરુહહંસરાજઃ ।
પ્રજાસરોજાવલિરશ્મિરાજઃ સસોદરોઽરાજત વીરરાજઃ ॥ ૧.૪૩ ॥

પૌત્રે પવિત્રાહ્વયજામિપૌત્રે ધરાં નિધાયાસુરધીષુ તાપમ ।
કીર્તિં ત્રિલોક્યાં હૃદયં મુકુંદે ભેજે પદં સ્વં સહજૈઃ સ ભીમઃ ॥ ૧.૪૪ ॥
વિષ્ણોઃ પદાંતં ભજતાઽનિલેન ઘોરપ્રઘાતૈરિતિ નાશિતાસ્તે ।
રસોજ્ઝિતાશ્ચંચલવૃત્તયોઽલં શોભાં ન ભેજુઃ સુરવૈરિમેઘાઃ ॥ ૧.૪૫ ॥
એતત્પ્રતીપં કિલ કર્તુકામાઃ નષ્ટૌજસઃ સંકટમેવમાપ્ય ।
મુકુંદવૈગુણ્યકથાં સ્વયોગ્યાં કાલે કલાવાકલયંત તેઽલમ ॥ ૧.૪૬ ॥
યો ભૂરિવૈરો મણિમાન મૃતઃ પ્રાગ વાગ્મી બુભૂષુઃ પરિતોષિતેશઃ ।
સ સંકરાખ્યોઽંઘ્રિ તળેષુ જજ્ઞે સ્પૃધા પરેઽપ્યાસુરિહાસુરેંદ્રાઃ ॥ ૧.૪૭ ॥
સાન્નાય્યમવ્યક્તહૃદાખુભુગ વા શ્વા વા પુરોડાશમસારકામઃ ।
મણિસ્રજં વા પ્લવગોઽવ્યવસ્થો જગ્રાહ વેદાદિકમેષ પાપઃ ॥ ૧.૪૮ ॥
જનો નમેન્નાપરથેતિ મત્વા શઠશ્ચતુર્થાશ્રમમેષ ભેજે ।
પદ્માકરં વા કલુષીચિકીર્ષુઃ સુદુર્દમો દુષ્ટગજો વિશુદ્ધમ ॥ ૧.૪૯ ॥
અવૈદિકં માધ્યમિકં નિરસ્તં નિરીક્ષ્ય તત્પક્ષસુપક્ષપાતી ।
તમેવ પક્ષં પ્રતિપાદુકોઽસૌ ન્યરૂરુપન્માર્ગમિહાનુરૂપમ ॥ ૧.૫૦ ॥
અસત્પદેઽસન સદસદ્વિવિક્તં માયાખ્યયા સંવૃતિમભ્યધત્ત ।
બ્રહ્માપ્યખંડં બત શૂન્યસિદ્ધ્યૈ પ્રચ્છન્નબૌદ્ધોઽયમતઃ પ્રસિદ્ધઃ ॥ ૧.૫૧ ॥
યદ બ્રહ્મસૂત્રોત્કરભાસ્કરં ચ પ્રકાશયંતં સકલં સ્વગોભિઃ ।
અચૂચુરદ વેદસમૂહવાહં તતો મહાતસ્કરમેનમાહુઃ ॥ ૧.૫૨ ॥
સ્વસૂત્રજાતસ્ય વિરુદ્ધભાષી તદ્ભાષ્યકારોઽહમિતિ બ્રુવન યઃ ।
તં તત્ક્ષણાદ યો ન દિધક્ષતિ સ્મ સ વ્યાસરૂપો ભગવાન ક્ષમાબ્ધિઃ ॥
૧.૫૩ ॥
નિગમસન્મણિદીપગણોઽભવત તદુરુવાગ્ગણપંકનિગૂઢભાઃ ।
અવિદુષામિતિ સંકરતાકરઃ સ કિલ સંકર ઈત્યભિશુશ્રવે ॥ ૧.૫૪ ॥

વિશ્વં મિથ્યા વિભુરગુણવાનાત્મનાં નાસ્તિ ભેદો ।
દૈત્યા ઈત્થં વ્યદધત ગિરાં દિક્ષુ ભૂયઃ પ્રસિદ્ધિમ ॥
આનંદાદ્યૈર્ગુરુગુણગણૈઃ પૂરિતો વાસુદેવો ।
મંદંમંદં મનસિ ચ સતાં હંત નૂનં તિરોऽભૂત ॥ ૧.૫૫ ॥
॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
નારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે પ્રથમઃ સર્ગઃ ॥

www.yousigma.com